This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No. | | | | | | | | | | | |
अनुक्रमाङ्कः

Code No. 62/S/N
गूढसंख्या

SET No. A
स्तबकः

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (246)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ____________________

Signature of two Invigilators 1. ____________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ____________________

---

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।


UNNATI EDUCATIONS
9899436384, 9654279279

# SANSKRIT VYAKARAN

## संस्कृतव्याकरणम्

## (246)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10** [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** सर्वे प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) उपसर्गसंज्ञाविधायकं सूत्रं विद्यते ।

(क) प्रादयः (ख) गतिश्च

(ग) उपसर्गाः क्रियायोगे (घ) चादयोऽसत्वे

(2) अयं वर्णः वृद्धिसंज्ञकः अस्ति ।

(क) आ (ख) इ

(ग) अ (घ) ऋ

(3) अकारस्य कति भेदाः सन्ति ।

(क) दश (ख) अष्टादश

(ग) द्वादश (घ) पञ्चदश

(4) एङि पररूपम् इति सूत्रस्यापवादसूत्रम् अस्ति ।

(क) वृद्धिरेचि (ख) एङः पदान्तादति

(ग) इको यणचि (घ) एत्येधत्यूठ्सु

(5) स्तोः श्चुना श्चुः इत्यस्य निषेधसूत्रम् अस्ति ।

(क) तोः षि (ख) शात्

(ग) नाज्झलौ (घ) अनचि च



UNNATI EDUCATIONS
9899436384, 9654279279

(6) हशि च इति सूत्रस्य उदाहरणम् अस्ति ।

(क) शिवो वन्द्यः (ख) शिवोऽर्च्यः

(ग) हरिस्त्राता (घ) देवायिह

(7) अधोलिखितेषु संज्ञासूत्रं चिनुत ।

(क) विभक्तिश्च (ख) अमि पूर्वः

(ग) परश्च (घ) ङ्याप्प्रातिपदिकात्

(8) हरिशब्दस्य पञ्चम्येकवचनस्यं रूपं भवति ।

(क) हरेः (ख) हरये

(ग) हरिभ्याम् (घ) हरिणा

(9) अभिहिते कर्मणि का विभक्तिः भवति ।

(क) प्रथमा (ख) तृतीया

(ग) पञ्चमी (घ) द्वितीया

(10) अधोलिखितेषु औपश्लेषिकाधिकरणस्य उदाहरणं विद्यते ।

(क) कटे शेते (ख) मोक्षे इच्छा अस्ति

(ग) सर्वस्मिन् आत्मा अस्ति (घ) न किमपि

[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) घिसंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । 1+1

(2) इको गुणवृद्धी इति परिभाषायाः अर्थं विलिख्य एकं प्रवृत्तिस्थलं प्रदर्शयत । 1+1

(3) नश्चापदान्तस्य झलि इति सूत्रस्य अर्थम् उदाहरणं च लिखत । 1+1

(4) शान्तः इत्यत्र परसवर्णविधायकं सूत्रं विलिख्य तस्य उदाहरणं लिखन्तु । 1+1

(5) वाऽवसाने इति सूत्रस्य अर्थं विलिख्य तस्य उदाहरणं ददातु । 1+1

(6) सर्वशब्दस्य सर्वनामसंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखन्तु । 1+1

(7) कालाध्वनोरत्यन्तसंयोगे इति सूत्रस्य अर्थम् उदाहरणं च लिखत । 1+1

(8) इत्थम्भूतलक्षणे इति सूत्रस्य अर्थम् उदाहरणं च वर्णयन्तु । 1+1

(9) गोदः इत्यत्र कप्रत्ययविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । 1+1

(10) कृत्यल्युटो बहुलम् इति सूत्रस्य अर्थम् उदाहरणं च लिखन्तु । 1+1



UNNATI EDUCATIONS
9899436384, 9654279279

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) इग्यणः सम्प्रसारणम् इति सूत्रस्य व्याख्यां लिखत, अथवा वर्णप्रकटनस्य उपायं प्रतिपादयत ।

(2) यू स्त्राख्यौ नदी, परः सन्निकर्षः संहिता इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु ।

(3) गङ्गौघः, तच्छिवः इत्यनयोः प्रयोगयोः कस्यचिदेकस्य ससूत्रं सिद्धिं लिखन्तु ।

(4) उपैति, शिवोऽर्च्यः इत्यनयोः प्रयोगयोः कस्यचिदेकस्य ससूत्रं सिद्धिं लिखन्तु ।

(5) अमि पूर्वः, दीर्घाज्जसि च इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु ।

(6) रामान्, हरयः इत्यनयोः प्रयोगयोः कस्यचिदेकस्य ससूत्रं सिद्धिं लिखन्तु ।

(7) इन्द्रः स्वर्गम् अधिवसति, गुरुः शिष्याय पुस्तकं ददाति इत्यनयोः वाक्ययोः कस्यचिदेकस्य वाक्यस्य सिद्धिं लिखन्तु ।

(8) मित्रेण पच्यते, ईश्वरात् जायते जगत् इत्यनयोः वाक्ययोः कस्यचिदेकस्य वाक्यस्य सिद्धिं वर्णयन्तु ।

(9) कुरुचरः, कुम्भकारः इत्यनयोः प्रयोगयोः कस्यचिदेकस्य ससूत्रं सिद्धिं लिखन्तु ।

(10) पोरदुपधात् युवोरनाकौ इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) तुल्यास्यप्रयत्नं सवर्णम्, तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु ।

(2) झलां जश् झशि, अकः सवर्णे दीर्घः इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुरुत ।

(3) बहुवचने झल्येत्, ह्रस्वनद्यापो नुट् इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुरुत ।

(4) ह्रस्वस्य गुणः, एरनेकाचोऽसंयोगपूर्वस्य इत्यनयोरेकं सूत्रं व्याख्यात ।

(5) साधकतमं करणम्, रुच्यर्थानां प्रीयमाणः इत्यनयोरेकं सूत्रं व्याख्यात ।

---


UNNATI EDUCATIONS
9899436384, 9654279279